[1]मनसाऽऽज्ञायी, [A]नीतिज्ञः, ज्ञापः-ज्ञपः, जिज्ञपयिषुः-ज्ञीप्सुः, जिज्ञासुः, [B]जिज्ञापयिषुः, [2]जाज्ञः ;

ज्ञातव्यम्, ज्ञापयितव्यम्-ज्ञपयितव्यम्, जिज्ञपयिषितव्यम्-ज्ञीप्सितव्यम्, जिज्ञासितव्यम्, जाज्ञायितव्यम् ;

ज्ञानीयम्, ज्ञापनीयम्-ज्ञपनीयम्, जिज्ञपयिषणीयम्-ज्ञीप्सनीयम्, जिज्ञासनीयम्, जाज्ञानीयम् ;

ज्ञेयम्, ज्ञाप्यम्-ज्ञप्यम्, जिज्ञपयिष्यम्-ज्ञीप्स्यम्, जिज्ञास्यम्, जाज्ञाय्यम् ;

[3]ईषज्ज्ञानः-दुर्ज्ञानः-सुज्ञानः ; — — —

ज्ञायमानः, ज्ञाप्यमानः-ज्ञप्यमानः, जिज्ञपयिष्यमाणः-ज्ञीप्स्यमानः, जिज्ञास्यमानः, जाज्ञाय्यमानः ;

ज्ञायः, ज्ञापः-ज्ञपः, जिज्ञपयिषः-ज्ञीप्सः, जिज्ञासः, जाज्ञायः ;

ज्ञातुम्, ज्ञापयितुम्-ज्ञपयितुम्, जिज्ञपयिषितुम्-ज्ञीप्सितुम्, जिज्ञासितुम्, जाज्ञायितुम् ;

[4]ज्ञातिः, [5]आज्ञा, [C]अनुज्ञा, [6]उपज्ञा, [D]उपज्ञम्, संज्ञा, प्रज्ञा,

---

1. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति ताच्छील्ये णिनिः। 'मनसः संज्ञायाम्' (6-3-4) इति स्थिते, 'आज्ञायिनि च' (6-3-5) इति तृतीयाया अलुक्।
2. यङन्तात् पचायचि यङवयवस्याकारस्यातो लोपे, यङोऽवशिष्टस्य लुकि, अल्लोपस्य स्थानिवद्भावादाकारलोपे च रूपम्।
3. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच्।
4. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति क्तिच्।
5. 'आतश्चोपसर्गे' (3-3-106) इत्यङ्।
6. उपज्ञायते इत्युपज्ञा। कर्मण्यङ्। 'पाणिन्युपज्ञं व्याकरणम्' इत्यत्र पाणिनिकर्तृकप्राथमिकज्ञानविषयो व्याकरणमित्यर्थः। 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (2-4-21) इति नपुंसकत्वम्।

A. 'नीतिज्ञा नियतिज्ञा वेदज्ञा अपि भवन्ति शास्त्रज्ञाः।
ब्रह्मज्ञा अपि सुलभाः स्वाज्ञानज्ञानिनो विरलाः॥'
नी. दीक्षितस्य वैराग्यशतके 27.

B. 'त्वां जिज्ञापयिषू शक्तिं बुभूर्षू नु जगन्ति किम्।' भ. का. 9.37.

C. 'तस्य निर्वर्त्यं कर्तव्यं सुग्रीवो राघवाज्ञया।' भ. का. 6.145.

D. 'अथ प्राचेतसोपज्ञं रामायणमितस्ततः।' रघुवंशे 15.63.